वासुकिपत्न्याम् । वासुकौ परमेश्वरे च पु० "सहस्रशीर्षा पुरुष" इति श्रुत्या तस्य बहुशीर्षत्वोक्तेस्तथात्वम् ।

**अनन्तश्री** पु० अनन्ता अपरिमिता श्रीः परा शक्तिरस्य । परमेश्वरे "परास्य शक्तिर्विविधैव श्रूयते इति" श्रुत्या तस्य बहुशक्तिप्रतिपादनात्तथात्वम् ।

**अनन्ता** स्त्री नास्ति अन्तोऽस्याः ब० । विशल्यायामोषधौ (अनन्तमूल) इति ख्याते मूलभेदे, पार्वत्याम्, पृथिव्याम्, दुरालभायां, दूर्वायां, हरितक्यां, आमलक्याम्, गुडूच्याम्, अग्निमन्थवृक्षे, अग्निशिखावृक्षे, श्यामलतायाम्, पिप्पल्यां, नीलदूर्वायाम्, श्वेतदूर्वायां, शारिवौषधौ च ।

**अनन्त्य** न० अनन्तस्येदम् यत् । हिरण्यगर्भपदे ।

**अनन्द** त्रि० न नन्दयति नन्द–णिच्–अच् न०त० । आनन्दयितृभिन्ने" अनन्दा, नाम ते लोका इति कठ०व० ।

**अनन्न** न० न०त० । अदनीयभिन्ने । "न किञ्चिदनन्नं भवति आ श्वभ्यः आ शकुनिभ्य" इति छा०उ० ।

**अनन्य** त्रि० न अन्यः सर्वना० । अन्यभिन्ने स्वस्मिन् "अनन्यरतिरासीन" इति मनुः अनन्यस्मिन् स्वस्मिन् रतिरनुरागोऽस्येति तदर्थः । नास्ति अन्यो यस्य उपास्यत्वेन विषयत्वेन वा । अन्यासेवके "अनन्याश्चिन्तयन्तोमामिति" अनन्यविषये च । "पुरुषः स परः पार्थ! भक्त्या लभ्यस्त्वनन्ययेति" च गीता । अस्य नञ उत्तरत्र पदान्तरसत्त्वे असमर्थसमासाश्रयणात् तदर्थेनैवान्वयः । यथा "अनन्यदृष्टिः सवितारमैक्षतेत्यादौ" अन्यत्र दृष्ट्यभावस्य, अनन्यचेता इत्यादौ अन्यत्र चेतोऽभावस्य, अनन्यकाम इत्यादौ अन्यत्र कामाभावस्य च बोधनमेवमन्यत्र ।

**अनन्यगतिक** त्रि० नास्ति अन्या गतिरस्य कप् । अन्योपायरहिते तन्मात्राश्रये च । "अनन्यगतिके जने विगतपातके चातके" इत्युद्भटः ।

**अनन्यज** पु० नास्ति अन्यद्यस्मात् सर्व्ववस्तुभेदानां तदात्मकत्वात् अनन्यो विष्णुः तस्मात् जायते जन–ड ५त० । कामदेवे । तस्य कृष्णात् रुक्मिण्यां जन्मेति भाग० १०मस्क०"तस्माच्च तादृशीमवस्थां गतायां जनस्यानन्यजेनेति" दशकु० ।

**अनन्यदेव** पु० न अन्यद्यस्मात् सर्व्वात्मकत्वात् तादृशोदेवः । परमेश्वरे विष्णौ "सर्व्वदेवमयोहरिरित्युक्तेस्तथात्वम् ।

**अनन्यपूर्व्वा** स्त्री न अन्यः पूर्व्वो यस्याः सा अन्य पूर्व्वा न भवति । अन्याभुक्तायां स्त्रियाम् "मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः । तथाप्यनन्यपूर्व्वेव तस्मिन्नासीद्वसुन्धरेति" रघुः ।

**अनन्यभाज्** त्रि० न अन्यम् अन्यां वा भजते भज–ण्वि अस० पुंवद्भावः । अन्यस्यान्यस्या वा सेवनाकारिणि । "भजते मामनन्यभागिति" गीताः "अनन्यभाजं पतिमाप्नुहीति" कुमा० ।

**अनन्यवृत्ति** त्रि० न अन्या विभिन्ना एकरूपा वृत्तिर्मनोवृत्तिरस्य । एकतानचित्ते । न अन्या वृत्तिर्जीवनोपायोऽस्य । एकमात्रजीवने त्रि० ।

**अनन्यसाधारण** त्रि० न अन्यस्यान्यधर्म्मस्य साधारणः सदृशः । अन्यधर्म्मासदृशे "अनन्यसाधारणमेव कर्म्मेति" कुमा० ।

**अनन्वय** त्रि नास्ति अन्वयो यत्र ब० । अन्वयशून्ये । शाब्दबोधे परस्परं संसर्गशून्ये अन्वयस्यान्वयशब्दे वक्ष्यते अर्थालङ्कारभेदे पु० । तल्लक्षणं यथा "उपमानोपमेयत्वे एकस्यैव त्वनन्वय" इति सा०द० । "राजीवमिव राजीवं जलं जलमिवाजनी"त्यादौ च अनन्वयात् तदलङ्कारत्वं तथा हि उपमानोपमेयभावे सादृश्यज्ञानावश्यकत्वेन तस्य बोधने नियते तद्भिन्नत्वे सति तद्गतभूयोधर्म्मवत्त्वरूपसादृश्यस्य भेदगर्भिततया स्वप्रतियोगिकभेदस्य स्वस्मिन्नसम्भवेनापाततोऽनन्वय एव तात्पर्य्येण तु इतरसादृश्याभावपरत्वलक्षणयान्वयस्तथा च राजीवं राजीवेतरासदृशमिति बोधात्तस्योत्कर्षो व्यज्यते । एवं "रामरावणयोर्युद्धं रामरावणयोरिवे"त्यत्रापि ।

**अनप** त्रि० न सन्ति आधिक्येनापो यत्र नञ्पूर्व्वकत्वेऽपि बहुव्रीहौ अच्समा० । स्वल्पजले पल्वलादौ ।

**अनपकर्म्मन्** न० अपकर्म्म अपाकरणं अभावार्थे न०त० । त्यागाभावोपलक्षिते दत्तस्य आदाने "दत्तस्यानपकर्म्म चेति" मनुः अपकर्म अपात्रे पात्रबुद्ध्या क्रोधादिना वा दत्तस्यानपकर्म, पुनर्ग्रहणम् । "ऋणस्यापकर्म चेति" स्मृतिः । अनपकर्म अपाकरणाभावः अशोधनमित्यर्थः । अनपक्रियाप्यत्र स्त्री । अपाकरणाभावे । "ऋणानामनपक्रियेति" स्मृतिः ।

**अनपच्युत** त्रि० अप+च्यु–भावे क्त न०ब० । विनाशरहिते "स्वर्थं सुवज्रमनपच्युतमिति" ऋ० ४,१७,४, अनपच्युतं विनाशरहितमिति" भा० ।

**अनपत्य** त्रि० नास्ति अपत्यं यस्य । अपत्यशून्ये । न हितमपत्यानामिति, पताय पतनाय हितं पत+यत् वा न०त० ततः न०त० । अपत्याहिते, पतनकारणे च "युयोत नो अनपत्यानीति ऋ० २, ५४,१८, अनपत्यानि अपत्यानां पुत्राणामहितानि, पतनकारणं न भवत्यपत्यं तदन्यानि पतनकारणानीति" भाष्यम् ।